# श्री वाराह्यनुग्रहाष्टकं

ईश्वर उवाच |
मातर्जगद्रचननाटकसूत्रधार-
-स्त्वद्रूपमाकलयितुं परमार्थतोऽयम् |
ईशोऽप्यमीश्वरपदं समुपैति तादृक्
कोऽन्यः स्तवं किमिव तावकमादधातु || 1 ||

नामानि किंतु गृणतस्तव लोकतुंडे
नाडंबरं स्पृशति दंडधरस्य दंडः |
यल्लेशलंबितभवांबुनिधिर्यतोऽयत्
त्वन्नामसंस्मृतिरियं न नुनः स्तुतिस्ते || 2 ||

त्वच्चिंतनादरसमुल्लसदप्रमेया-
-ऽऽनंदोदयात्समुदितः स्फुटरोमहर्षः |
मातर्नमामि सुदिनानि सदेत्यमुं त्वा-
-मभ्यर्थयेऽर्थमिति पूरयताद्दयालो || 3 ||

इंद्रेंदुमौलिविधिकेशवमौलिरत्न-
-रोचिश्चयोज्ज्वलितपादसरोजयुग्मे |
चेतो नतौ मम सदा प्रतिबिंबिता त्वं
भूया भवानि भवनाशिनि भावये त्वाम् || 4 ||

लीलोद्धृतक्षितितलस्य वराहमूर्ते-
-र्वाराहमूर्तिरखिलार्थकरी त्वमेव |
प्रालेयरश्मिसुकलोल्लसितावतंसा
त्वं देवि वामतनुभागहरा हरस्य || 5 ||

त्वामंब तप्तकनकोज्ज्वलकांतिमंत-
-र्ये चिंतयंति युवतीतनु मागलांताम् |
चक्रायुधां त्रिनयनां वरपोतृवक्त्रां
तेषां पदांबुजयुगं प्रणमंति देवाः || 6 ||

त्वत्सेवनस्खलितपापचयस्य मात-
-र्मोक्षोऽपि यस्य न सतो गणनामुपैति |
देवासुरोरगनृपूजितपादपीठः
कस्याः श्रियः स खलु भाजनतां न धत्ते || 7 ||

किं दुष्करं त्वयि मनोविषयं गतायां
किं दुर्लभं त्वयि विधानुवदर्चितायाम् |
किं दुर्भरं त्वयि सकृत् स्मृतिमागतायां
किं दुर्जयं त्वयि कृतस्तुतिवादपुंसाम् || 8 ||

इति श्री वाराह्यनुग्रहाष्टकम् |